MANĪṢĀ - *A Research Journal of Sanskrit* ISSN : 2583-2271
Vol. - I, No. 1: 2021

# जीवनं जलम्

ड. गोपीकृष्णन्-रघुः

**प्रबन्धसारः**

*जलं मानवजीवने एकम् अत्यावश्यकं वस्तु। जलं विना जीवनं नैव सम्भवति। तस्मादेव कारणात् प्राचीनकाले जनैः श्रद्धाभक्तिपुरःसरं नदी देवीरूपेण पूजिता भवति स्म। कोशग्रन्थेषु जलस्य बहूनि नामानि प्राप्यन्ते। यस्य वस्तुनः आधिक्येनोपयोगः यस्मिन् चाधिकश्रद्धा तस्यैवैमं नामाधिक्यं भवितुमर्हतीति तदानीन्तनकाले जलस्य उपयोगित्वं माहात्म्यञ्च अनस्वीकार्यमेव। आयुर्वेदेऽपि जलस्य विविधा भेदा गुणदोषाश्च आलोचिताः। किन्तु अत्यन्तापेक्षणीयस्य तादृशस्य जलस्य विषये अस्माकं दृष्टिः कीदृशी वर्तते इदानीम्। अस्य चोत्तरं सरलमेव अत्यन्तमुपेक्षाभावः। अत एव वयं पश्यामः अस्माकं नदी-कूप-तडागादिषु मालिन्यं निक्षिपामः, विद्यमानानां जलस्रोतसां नाशनं कुर्मः। फलतः प्राक् जलसमृद्धेष्वपि देशेष्वप्यधुना जलसमस्या, शुद्धजलाभावः, मलिनजलजन्यानां रोगाणामाधिक्यञ्च। एवमग्रेऽपि यदि स्यात् तर्हि नाचिराद् पृथिव्यामपि जीवाभावः स्यात्। तस्मात् पूर्वजानां जलविषयिणीं श्रद्धां मनसि धारयित्वा अस्माकमपि इदं कर्तव्यं यज्जलस्य रक्षणं सदुपयोगश्चेति येन भविष्यत्कालिका अपि अस्माकं विषये कृतज्ञाः भवेयुरिति।*

## ०. भूमिका

जलं जीवतः जन्तोः अनुपेक्षणीयेषु अन्यतमं वस्तु। जगति जीवनं जलाधारितमेव। तस्मादेव खलु मङ्गलादिष्वपि ग्रहेषु जीवसान्निध्यनिर्णयार्थं जलसान्निध्यस्य अन्वेषणं कुर्वन्ति गवेषकाः। अस्माकं पृथ्व्यामपि जीवरक्षणाय जलमेवावश्यकं वर्तते। अस्याः तापमानरक्षणे जीवानुकूल-वातावरणरक्षणे च जलस्य योगदानं महदस्ति। जलचक्रप्रवर्तनादेवास्माकं ऋतुचक्रप्रवर्तनं भवति। भूभागस्य अशीतिप्रतिशतं जलमयमेवास्ति। अस्माकं शरीरस्यापि सा एव स्थितिः।

किन्तु अत्यन्तापेक्षणीयस्य तादृशस्य जलस्य विषये अस्माकं दृष्टिः कीदृशी वर्तते इदानीम्। अस्य चोत्तरं सरलमेव अत्यन्तमुपेक्षाभावः। अत एव वयं पश्यामः अस्माकं नदी-कूप-तडागादिषु मालिन्यं निक्षिपामः, विद्यमानानां जलस्रोतसां नाशनं कुर्मः। फलतः प्राक् जलसमृद्धेष्वपि देशेष्वप्यधुना जलसमस्या, शुद्धजलाभावः, मलिनजलजन्यानां रोगाणामाधिक्यञ्च। एवमग्रेऽपि यदि स्यात् तर्हि नाचिरात् पृथिव्यामपि जीवाभावः स्यात्।

प्रसङ्गे चास्मिन् अस्मत्पूर्वजानां विषयेऽस्मिन् कीदृशी दृष्टिरासीदिति यदि पश्यामस्तर्ह्याश्चर्यमेव भविष्यति। ते जलं केवलं पेयमित्येव न अपि त्वौषधवन्मन्यन्ते स्म। तदत्र प्रतिपाद्यते मया।

## १. प्राचीनभारतीयानां जलविषयिणी दृष्टिः

भारतीयानां धार्मिकी आस्था प्रसिद्धा एव। सर्वत्रापि ते धार्मिकदृष्ट्यैव प्रवर्तन्ते। अत एवादराधिक्यदर्शनाय ते वस्तुषु पूज्यत्वम् आरोपयन्ति। पूज्यस्य वस्तुनः रक्षणे आस्थावन्तः श्रद्धालवः भवन्तीति तस्य रक्षणं सुकरम्। एवञ्च श्रद्धाकल्पनमपि रक्षणोपायः आसीत्।

जलविषयेऽपि ईदृशी भावना दृश्यते स्म प्राचीने भारते। तेषां नदीसमुद्रादीनां जलस्रोतांसि पूज्यान्यासन्। तेषां रक्षणपोषणादिकं पुण्यावहं मत्वा श्रद्धया कुर्वन्ति स्म। तस्य मुकुटोदाहरणं गङ्गानदी वर्तते। गङ्गा भारतीयानामभिन्नमङ्गमस्ति। न कुत्रापि जगति कस्याश्चिन्नद्याः ईदृशं स्थानं वर्तते यावत् गङ्गायाः। न केवलं गङ्गा अपि तु अन्याश्च नद्यः पूज्याः एव। अतः खलु स्नानसमये उच्यते-

"गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धु कावेरि जलेऽस्मिन्सन्निधिं कुरु॥" इति।

वेदेष्वपि जलमहिमा वर्णिता वर्तते। हिरण्यगर्भसूक्ते सर्वस्याप्यस्य प्रपञ्चस्य

आदिमं तत्त्वं जलमिति वर्णयति। जलादेव सर्वस्याप्युत्पत्तिः। यथा-

"आपो ह यद्बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम्।

ततो देवानां समवर्ततासुरेकः कस्मै देवाय हविषा विधेम॥"[1]

महज्जलम् अग्न्यादिभूतानि गर्भं धृत्वा तान्यजनयन्। ततः देवानां प्राणाः उत्पन्नः इति सामान्योऽर्थः। जलमेव जीवननिदानम् इति महर्षीणां दर्शनम्।

भाषादिशा अपि जलमल्पं प्रधानं भवति। संस्कृतभाषायां तावत् जलस्य अशीत्यधिक-द्विशतं नामानि वर्तन्ते। इदं तस्य प्राधान्यस्य द्योतकं भवति। यस्य वस्तुनः आधिक्येनोपयोगः यस्मिन् चाधिकश्रद्धा तस्यैवैमं नामाधिक्यं भवितुमर्हति। न केवलं नाम्नः आधिक्यं किन्तु नाम्नः अर्थोऽपि जलस्य प्राधान्यं गमयति। बहवश्चान्वर्थनामानः वर्तन्ते तस्य। यथा जीवनम्, अमृतं, भुवनम् इत्यादि। इमानि च जलस्य गुणद्योतकाः अपि भवन्ति।

## ३.जलविषये आयुर्वेदविचारः

यथैवास्य जीवनमिति नाम तथैवास्य प्राधान्यं जीवनारोग्यचर्चायां जायते।अतः खलु श्रूयते- "पानीयं प्राणिनां प्राणाः विश्वमेव च तन्मयम्"[2] इति। अत एव जलविषये आरोग्यशास्त्रे आयुर्वेदे महती चर्चा विद्यते। जलभेदानां गुणदोषाणाञ्च चर्चा शास्त्रे सुविस्तरं कृता वर्तते।

### ३.१ जलभेदः

जलस्य आन्तरीक्ष-भौमभेदेन द्विधा विभागः प्रथमतः कृतः। आन्तरीक्षं नाम अन्तरीक्षे भवः इत्यर्थः। सूर्यतापेन बाष्पीकृतं जलं दिवि वाय्वादिस्पर्शात् शीतत्वमाप्य आन्तरिक्षं जलं भवति। इदमेवात्यन्तनिर्दुष्टं शुद्धं जलम्। तस्मिन्नितरवस्तुस्पर्शाभावात्। यच्च मालिन्यमासीत्सर्वं बाष्पीकरणेन नष्टमभवत्। अत एव अस्यैकान्ततः पथ्यत्वमुक्तं शास्त्रे।

चत्वारो तस्य भेदाः धार-कार-तौषार-हैमनाम्ना। धारं नाम वर्षणात् प्राप्यं जलं, कारं नाम घनीभुतं हिमखण्डवत् वृष्टौ पतति। तौषारं शीतकालेषु कुझटिकादि प्रातः तृणप्रणादिषु विद्यमानं जलम्। हैमश्च हिमरूपेण प्राप्यम्। भौमस्य च सप्तभेदाः यथा कौप-नादेय-सारस-ताडाग-प्रास्रवण-औद्भिद-चौण्ड्य- नाम्ना। एषु सर्वेष्वपि धारस्यैवातिमहत्वं वर्तते।

धारस्य च पुनः द्विधा भेदः गाङ्गं सामुद्रञ्चेति। तेषु च गाङ्गं प्रधानं मुख्यञ्च। तदप्याश्वयुजमासे पततः श्रेष्ठत्वमुच्यते। तस्येदं रहस्यं यत् वर्षर्त्वारम्भकाले अन्तरीक्षे धूलीधूमादिकणानां सद्भावात् तद्योगेन जलं मलिनमेव पतति। यावता च वर्षासमाप्तिः भवति तावता अन्तरीक्षं शुद्धं भवति। तेन अन्यस्पर्शरहितं शुद्धं जलं पततीति तस्य पथ्यत्वं शास्त्रे प्रोक्तम्। तस्य च भूस्पर्शात् प्रागेव संग्रहः कार्यः यतः भूस्पर्शान्मलिनता भवति।

### ३.२ जलस्यौषधगुणः

एवंभुतं जलं न केवलं तृष्णानिवृत्त्यर्थम् उपयुक्तं भवति अपि तु औषधवदपि भवति। भोजनादौ जलपानस्य नियमः वर्तते। तत्र भोजनकाले जलपानस्य फलानि एवं वर्णितमस्ति "समस्थूलकृशा भुक्तमद्ध्यान्त-प्रथमाम्बुपराः"[3] इति। एवं शीतजलं मदात्ययं, ग्लानिं, मूर्छाञ्च वारयति। छर्दिश्रमशिरोभ्रम-ज्वलनादीनामपि निवारणो-पयत्वेन शीतजलं प्रशस्तम्।

उष्णजलं कफमेदवातनाशकं ज्वरकासादि निवारकञ्च भवति। शृतशीतजलपानं मद्यज-

[1] ऋग्वेदः १०/१२१

[2] अष्टाङ्गहृदयम् ५/१४

[3] अष्टाङ्गहृदयम् ५/१५

ISSN : 2583-2271
Vol. - I, No. 1: 2021

न्येषु सन्निपातजन्येषु रोगेषु पित्ताधिक्ये च पेयं भवति। एवमेव अतिसारदाहविषमूर्छादिषु छर्द्यादौ च जलमुत्तममौषधं वर्तते।

**४. उपसंहारः**

एवं बहुगुणोपेतत्वादेव अस्मत्पूर्वजैः जलस्य पूज्यं स्थानं कल्पयित्वा तस्य रक्षणं कृतम्। गुणमर्मज्ञैः तैः अवश्यमेवैतन्मनसि निधायास्य नामकरणमप्युत्तमं विहितम् "पयः कीलालममृतं जीवनं भुवनं वनम्"4 इति। तस्मादस्माकमपि इदं कर्तव्यं यज्जलस्य रक्षणं सदुपयोगश्चेति येन भविष्यत्कालिका अपि अस्माकं विषये कृतज्ञाः भवेयुः।

**सहायकग्रन्थाः**

1, सुश्रुतसंहिता, सम्पादकः-श्रीहाराचन्द्र-चक्रवर्ति, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहलि, 2008
2, अष्टाङ्गहृदयम्, सम्पादकः-श्री कविराज-अत्रिदेवगुप्तः, चौखम्भा प्रकाशनम्, वाराणसि, 2007
3, अमरकोशः, सम्पादकः-श्री वासुदेवपण-शीकरः, चौखम्बा संस्कृतसंस्थानम्, नवदेहलि, 2011

[4] अमरकोशः वारिवर्गः४